No. ५६४८ ब

Title कादिमतानुसारेणश्रीललितापूजन- (विधि

Author

Extent १८०

Subject तन्त्रम् संपूर्णम्

नं० ५६४८-घ

कादिमतानुसारेण श्रीललिता पूजन विधिः (तन्त्रम्)

पत्राणि १७ (सप्तदशानि) (सम्पूर्णम्)

१ ॐ श्रीगणेशाय नमः ब्रह्मविष्णुशिवाराध्यमवाङ्मनसगोचरं स्वरूपं तमहं वंदे कर्त्तारं नाम
रूपयोः १ प्रणम्य परमां शक्तिं महागणपतिं गुरुं तंत्रसारानुसारेण लिख्यते पूजनक्रमं २ दृ
ष्ट्वाकादिमतं पूर्वव्याख्यातस्य मनोरमां संप्रदायानुरोधेन विलिख्यते यथामति ३ तत्र यथा
विधि गुरोर्विद्यां लब्ध्वाभिषेकं पूर्णाभिषेकं च लब्ध्वा देवीमुपासीत यथा अपरात्रे प्रबु
द्धा देवीरूपमात्मानं ध्यात्वा तन्मयं गुरुं च ध्यात्वा गुरुं स्तुवीत ॐ नमस्ते नाथ भगवन् शिवाय
गुरुरूपिणे विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह १ नवाय नवरूपाय परमार्थैकरूपिणे
सर्वज्ञानतमोभेदभानवे चिद्घनाय ते २ स्वतंत्राय दयाक्लृप्तविग्रहाय शिवात्मने परतंत्राय
भक्तानां भव्यानां भव्यरूपिणे ३ विवेकिनां विवेकाय विमर्शाय विमर्शिनां प्रकाशाय प्र
काशानां ज्ञानिनां ज्ञानरूपिणे ४ पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्यधः सदा मच्चित्तरूपे
ण विधेहि भवदासनं ५ इति पुनः फलमपि तेनैव स्तुवीत पंचभिः श्लोकैस्तु नित्यं सर्वसिद्धये ६
प्रातः प्रबोधसमये जपान्तु दिवसं भवेत् ततो वहन्नाडीपदं पुरस्सरमुत्थाय आवश्यकं नि
र्हृत्य स्नात्वा संध्याद्वयमनुपास्य प्रातःसंध्यायां नव वारं मध्याह्ने षड्विंशद्वारं सायं षोडशवारं जपि
त्वा तर्पणं सूर्यार्घं द्वारपूजां वास्तुपूजां आसनोपवेशनं गुरुवंदनं भूतशुद्ध्यादि प्रपंचयागांत
मातृकान्यासं त्वेकं यः शरीरस्य प्रथ्यैफलार्थं कांक्षिन्मातृकान्यासानि द्वाविंशत्स्थानपि कुर्यात्
ततेव तदंगत्वेन तत्क्रममंत्रैर्वैकादशो मातृकायाः षडंगो मातृकान्यासमेव सर्वांसां प्रथमं कृत्वा

पश्चात्तत्रोदितं न्यसेत् ललितायास्तु वर्गैस्तु षोडशभिरेव तु तेन तस्यास्तु लिपिन्यासो नै
वसमीरितमिति शान्त्रसिद्धिकामश्चैत्यंच विंशपटलोक्तमातृकाविद्याभिः सार्द्धं मातृकास्थानेषु
दिननित्यासहितां श्रीविद्यां न्यसेत् तादात्म्यता भवति दिननित्यास्तु तेनोक्ताः युगादिदिनमारभ्य
प्रतिदिनमेकैकगणनाभाः यथा अं आ इ ई इति युगप्रथानदिने एवं वर्त्तमानदिनान्तं षट्त्रिंशत्
त्रसहस्रशताधिकविंशतिसहस्रप्रतिदिवसैकैकदिननित्या अहर्गणाभासाः तिथिनित्यास्तु
प्रतिपत्तिथिमारभ्य पंचदशंपतमं बिके कामेश्वर्यादि चित्रान्तादेव्यस्त्वेकैकविग्रहाः यतस्ततः
स्वस्वतिथौ तान्साः शुभ्यात्कुलादिभिरिति ततः पूजासाधनानि उपकल्प्य शुचिर्भूत्वा रक्ताम्बरध
रः स्वर्णस्रग्विस्रग्वीवारलभूषादियुतः कर्पूरवासितमुखपरिधानवस्त्रसर्वांगसमालिप्त
मनाः श्रीगुरुं स्वेष्टदेवीं शान्तमुखो वामपश्चात् सनेने नोपविशेत् तत्तु दक्षिणं तन्नैव ऊर्वोपरि न्यसेत्
न्यासात्तस्य दयोस्तले बाह्यपार्श्वे हृदयस्पर्शात्म्यभासनमुदीरितमिति ततः प्राणायामाः यथा
वामनासया यथाविधि यथाशक्ति वायुमापूर्य दक्षिणयापसार्य पुनर्दक्षिणया वायुमा
पूर्य वामया निर्गमय्य पुनर्वामया द्वात्रिंशन्मात्रया आपूर्य चतुःषष्टिमात्राभिर्धृत्वा षोड
शमात्राभिरेव रेचयेत् तदुक्तं तन्त्रैव वामेन नासारन्ध्रेण पूरयेदमृतात्मना स्मरन्नेवं मरुत्पश्चा
द्दक्षिणेनापसारयेत् एवं संसाधिते पश्चाद्द्वात्रिंशन्मात्रया हरेत् धारयेत्तु ततः षष्ठ्या रेच
येत्तं तुरीयतः इति मरुत् मरुतमित्यर्थः श्रीविद्याप्राणायामे अग्निसूर्यसोमात्मकवि

२ ध्यात्वैवं त्रयं मूलाधारहृदयद्वादशान्ते भ्रामयेदिति ज्ञेयं मूलविद्ययापि प्राणायामं कुर्या
त् इति संप्रदायः ततः ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हूं स्वाहा इति पुष्पाक्षतैर्जनसहि
तं बलिं दत्वा स्वमूर्ध्नि गंधपुष्पाक्षतैः त्रिविधनाथान्संपूज्य पूर्वोक्तस्तोत्रेण स्तुत्वा नतो नाथ
देव्यात्मानं विभाव्य तां द्वादशाक्षरीं के स्तुवीत पूजादाववसाने च ते श्लोकैः ततः स्तोत्रं यथा गणे
शग्रहनक्षत्रयोगिनीराशिस्वरूपिणीं देवीं मंत्रमयीं नौमि मातृकापीठरूपिणीं प्रणमामि
महादेवीं मातृकापीठरूपिणीं कालहल्लोहल्लोल्लोकलनाशकारिणीं यदक्षरैकमात्रे
पि संसिद्धे स्पर्द्धते नरः रवितार्क्ष्येन्दुकन्दर्पशंकरानलविष्णुभिः यदक्षरशशिज्योत्स्नामंडि
तं भुवनत्रयं वंदे सर्वेश्वरीं देवीं महाश्रीसिद्धमातृकां यदक्षरमहासूत्रप्रोतमेतज्जग
त्त्रयं ब्रह्माण्डादिकटाहान्तं वंदे तां सिद्धमातृकां यदेकादशमाधारं बीजं कोणत्रयोद्भ
वं ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते अकचादिटतोन्नतपयशाक्षरवर्गिणीं
ज्येष्ठांगबाहुहृत्पृष्ठकटिपादनिवासिनीं तामिकाराक्षरोद्धारां सारात्सारां परात्परां
प्रणमामि महादेवीं परमानंदरूपिणीं अद्यापि यस्या जानंति न मनागपि देवताः के
यं कस्मात्क केनेति स्वरूपारूपभावनां वंदे तामहमक्षय्यक्षकाराक्षररूपिणीं देवीं
कुलकल्लोलप्रोल्लसंतीं परां शिवां वर्गानुक्रमयोगेन यस्यां मात्राष्टकं स्थितं वंदे ता
मष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीं कामपूर्णजकाराख्यश्रीपीठान्तर्निवासिनीं चतुरा

त्रिकोणशंभूतां नौमि श्रीत्रिपुरामहं ॥१२॥ फलं तत्तत्रैव इति द्वादशभिः श्लोकैः स्तवनं सर्वसिद्धि
कृत् देव्याः स्तवं स्वरूपायाः स्तवनेन तत्त्वनयतः इति स्तुत्वा आत्मानं तादात्म्येन ध्यात्वा पूजनीयं
संपूज्य तदाज्ञया पूजामारभेत् यथा पीठादिषु स्वेदरं श्रीचक्रं प्रक्षालितं निधाय पूजयेत् श्री
चक्रे विशेषस्तत्रैव चतुरस्रं समारभ्य नवचक्राणि पतुक्रमात् अन्यतो न्यूनमामध्याङ्कस्या
न्निधनेयतं त्रिविक्रमाद्रन्यतं तत्तत्प्रजनं श्रियं लभेत् एकद्विषट्कमोन्नामः श्रियै कीर्त्यै
च पूजास्यते नवान्निसमरूपाणि सर्वाभीष्टार्थसिद्धये रक्तहेमनिरूपणे चतान्मेट षदिवक्रमात्
कृत्वा श्रीचक्रनिर्माणं स्थापयेत् पूजयेदपीति । मध्यत्रिकोणं नियतेयनमिति यतलोभोन्न
त्रं नियतं भवतीत्यर्थः त्रिविक्रमादिचतुरस्रपद्मद्वयरूपात् चतुर्दशारदशारद्वयमन्वन्तं
तस्मान्नवयोनिचक्रमिति एकद्विषट्कमोन्नाम इति चतुरस्रात्पद्मद्वयं तस्माच्चतुर्दशारा
दिकमित्यर्थः नवानीति नवेत्यर्थः तत्रान्यो विशेषः फलकायां पटे भित्तौ स्थापयेन्न कदाच
न स्थापितं यदि लोभेन मोहेनाज्ञानतो पि वा कुलं वित्तमपत्यं च निर्मूलयति सर्वथेति
तत्र श्रीचक्राधारपीठे स्वाग्रमारभ्य आग्नेयादिप्रादक्षिण्येन अष्टदिक्षु मध्ये च पुष्परागनीलवैडू
र्यविद्रुममौक्तिकमरकतवज्रगोमेदपद्मरागात्मकं ध्यात्वा फ्रीं श्रीं अं आं इं ईं उं ऊं ऋं ॠं लृं
लॄं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं

३ शं षं सं हं लं क्षं नवरत्नद्वीपाय नमः इति संपूज्य पुष्परागाय नीलाय वैडूर्याय विद्रुमाय मौ
क्तिकाय मरकताय वज्राय गोमेदाय महापद्मरागाय ततः कल्पवृक्षोद्यानं ध्यात्वा ह्रीं श्रीं कल्प
वृक्षोद्यानाय नमः ह्रीं श्रीं तरुभ्यो नमः ततो देवीमंडपं विभाव्य ज्ञानकर्मेंद्रियाण्यश्वरूपाणि ध्या
त्वा ह्रीं श्रीं इंद्रियाश्वेभ्यो नमः इति ततः संपूज्य इंद्रियार्थान् दशगजरूपान् ध्यात्वा ह्रीं श्रीं इंद्रि
यार्थगजेभ्यो नमः इति मंडपस्य कल्पितपश्चिमद्वारे संपूज्य त्वाथ तत्प्रासाददक्षिणे ततः चक्रे
श्वरीः संपूजयेत् यथा घटिकायामदिनरात्रितिथिवारपक्षमासवर्षात्मकं नवरूपं कालं ह्रीं
श्रीं कालचक्रेश्वरीशक्तिपादुकां पूजयामि ततो भादिनवमुद्रां ध्यात्वा ह्रीं श्रीं मुद्राचक्रेश्वरी
शक्तिपादुकां पूजयामि नववर्गात्मकां मातृकां विभाव्य ह्रीं श्रीं मातृकाचक्रेश्वरीशक्तिपादु
कां पूजयामि नवरत्नानि विचिंत्य ह्रीं श्रीं नवरत्नचक्रेश्वरीशक्तिपादुकां पूजयामि नवरत्नसं
बंधान्नवात्मानं देशं विचिंत्य ह्रीं श्रीं देशचक्रेश्वरीशक्तिपादुकां पूजयामि ततो गुरुं दिव्यसि
द्धमानवौघोपाधितो नवात्मानं विचिंत्य ह्रीं श्रीं गुरुचक्रेश्वरीशक्तिपादुकां पूजयामि पंचीकरण
शक्तियथाज्ञातृज्ञानज्ञेयनवात्मकं तत्त्वं विचिंत्य ह्रीं श्रीं तत्त्वचक्रेश्वरीशक्तिपादुकां पूजयामि
नवग्रहान् विचिंत्य ह्रीं श्रीं ग्रहचक्रेश्वरीशक्तिपादुकां पूजयामि त्वगादिसप्तधातुः प्राणरू
पनवकं विचिंत्य ह्रीं श्रीं मूर्तिचक्रेश्वरीशक्तिपादुकां पूजयामि ह्रीं श्रीं करुणातोयपरिवा

य नमः श्रीमालिनिकामंडपाय नमः मंडपान्तर्निर्ऋत्यादिकोणेषु विलोमेन॥ ह्रीं श्रीं देशरूपिणी
शक्तिपादुकां पूजयामि ह्रीं श्रीं कालरूपिणीशक्तिपादुकां पूजयामि ह्रीं श्रीं आकाररूपिणीश
क्तिपादुकां पूजयामि ह्रीं श्रीं शब्दरूपिणीशक्तिपादुकां पूजयामि तत्र ह्रीं श्रीं संगीतयोगिनीश
क्तिपादुकां पूजयामि ह्रीं श्रीं समस्तगुप्तप्रकटसिद्धयोगिनीशक्तिपादुकां पूजयामि इति देवीपी
ठं संपूज्य अर्घ्यं स्थापयेत् यथा स्वर्णरजतताम्रकाचमृण्मयानामन्यतमं पात्रं प्रक्षालितं साधा
रणं स्थापयित्वा शुद्धजलेन सूर्यगोरोचनकर्पूरकाश्मीरागरुकस्तूरिकाभिर्लिप्य अथाधारच
षट्कोणवृत्तं वह्निसूर्यसोमात्मकं विद्याखंडत्रयपदत्रयधातत्रयस्वरूपं व्याप्य इष्टदेवतादिभूतात्मका
ति मंत्रं विमृश्य तदुपरि पात्रमुद्रायोनिमुद्रां च प्रदर्श्य पात्रमध्ये श्रीचक्रं विभाव्य तत्र वाग्भीशवह्निनिर्ऋ
तिकोणेषु पूर्वतो दिक्षु च षडंगमंत्रैरभ्यर्च्य ततः षोडशनित्यामंत्रैरेकैकवारं श्रीविद्यान्तर्गतः खं
डेन दशवारं मूलविद्यादिनित्याभ्यो त्रिवारं जपित्वा ततः पात्रान्तरेण जलमर्घ्योदकमादाय तृती
यखंडेनात्मानं यागवस्तूनि च प्रोक्षयेत् त्रिवारं ततः मूलाधारहृदयद्वादशान्तेषु अग्निसूर्यसोमात्म
कविद्याखंडत्रयं ध्यात्वा अग्नीषोमात्मकं प्रथमतृतीयखंडं तेजो व्याप्तमध्यमखंडं ध्यात्वा मध्यखं
डतेजोभिस्तेजमेवाज्ञादिनेवविंदुमध्यवर्तिसूर्यं सहस्रारे मूलादिब्रह्मरंध्रान्तं व्याप्यानवक्लिन्ने स्थि
तं ज्योतिर्विभाव्य तत्तेजसा सहस्रारगतं स्वशरीरं विभाव्य तत्तेनान्तर्बहिः प्रकाशयेदेव विभाव्य सर्वांगं शरणाया
मेहकाकारं हृदि कुर्यात् अस्या विद्यायाः दक्षिणामूर्तिर्ऋषिः पंक्तिश्छंदः श्रीत्रिपुरसुंदरी देव

४ तेतिस्मरणमात्रात्क्रमपि केचिदिच्छन्ति ततः ऐं क्लीं सौः इति वामदक्षिणकरतलकरपृष्ठयोर
न्योन्यमार्जनात् करशुद्धिन्यासं विधाय आसनं चतुष्टयमेतैः श्रीचक्रं पूजयेत् यथा ह्रीं ऐं ह्रीं क्लीं
ह्रीं सौः देव्यासनाय नमः हैं ह्क्लीं ह्सौः चक्रासनाय नमः ह्सैं ह्स्क्लीं ह्सौः सर्वमन्त्रासनाय नमः
ह्रीं ऐं ह्रीं क्लीं ह्रीं सौः ह्रीं साध्यसिद्धासनाय नमः ततः षडङ्गन्यासः ऐं क्लीं सौः हृदयाय नमः प्रसा
रिततलेन पाणिना हृदयं स्पृशेत् तथैव शिरोपि ऐं क्लीं सौः शिरसे स्वाहा ऐं क्लीं सौः शिखायै व
षट् अङ्गुष्ठेन स्पृशिना शिखां ऐं क्लीं सौः नेत्रत्रयाय वौषट् तर्जनीमध्यमानामिकाभिः
ऐं क्लीं सौः अस्त्राय फट् इति मशङ्केन तालत्रयेण ऊर्ध्वीकृत्वा तर्जन्यङ्गुष्ठयोगेन छोटिकाभिः दिग्वि
दिग्बन्धः परिस्पृष्टो मध्ये च बद्धा विरक्तवा लघुतालत्रयं कुर्यादित्यस्त्रं ततो वाग्देवतान्यासः य
था अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः र्ब्लूं वशिनी वाग्देवतायै नमः ब्रह्मरन्ध्रे कं खं
गं घं ङं क्ल्हीं कामेश्वरी वाग्देवतायै नमः भाले चं छं जं झं ञं न्व्लीं मोदिनी वाग्देवतायै नमः
भ्रूमध्ये टं ठं डं ढं णं ल्ह्रूं विमला वाग्देवतायै नमः गले तं थं दं धं नं ज्म्रीं अरुणा वाग्देवतायै न
मः हृदये पं फं बं भं मं ह्स्ल्व्यूं जयिनी वाग्देवतायै नमः नाभौ यं रं लं वं शं षं सं हं क्ष्म्रीं सर्वेश्व
री वाग्देवतायै नमः मूलाधारे षं सं हं ळं क्षं म्क्षीं कौलिनी वाग्देवतायै नमः हस्तद्वये तत्पादयोः
मूलमारभ्य शिरोन्तं व्यापकन्यासः इति वाग्देवतान्यासः ततः कूटन्यासः मूर्द्धादिहृदयान्तं प्रथ
मखण्डं हृदयादि अपादान्तं द्वितीयखण्डं पादादि हृदयान्तं तृतीयखण्डं विन्यस्य ततः करद्वयेन तु

गुरूपदिष्टप्रक्रियया समस्तविद्याविर्भावकत्र्या संकृत्वा स्वशरीरे हृदयाकाशे लोहिता
ललितां बाणचापपाशसृणीकरैः दधानां कामराजांकेयं त्रिनेत्रां मुदितां स्मरेत् बाणचापपाश
सृणीरिति दक्षिणाधोहस्तमारभ्य प्रादक्षिण्येन दक्षोर्ध्वान्तं आयुधध्याने पतञ्जोकार्थं सम्य
गुक्तोऽवकल्प्य तथा ध्यात्वा हारहाटककटककेयूरकाञ्चीनूपुरग्रैवेयांगदमुद्रिकाभिरात्मा
भरणभूषितां ध्यात्वा गुरुप्रदेशतः मनसा संपूज्य कलारूपां ध्यात्वा गुरूपदिष्टयोगेना
भ्यर्च्य यथान्तःकरणशुद्धिरचनादात्मतया ज्ञानमवस्थाप्य बाह्यपूजार्थमनुज्ञाप्य बहि
रावाहयेत् यथा त्रिखण्डमुद्रां बध्वान्तः पूर्ववत् ध्यात्वा गुरूपदेशेनोच्छ्वासनैव बहिरानी
य लोहितामित्यादि ध्यात्वा ह्स्रैं हसकलरीं हस्रौः नमः इति विद्यया अयस्य च
क्रमध्यस्य योनिमध्ये निवेशयेत् तथाविधां तां धारणाध्यात्वा मुद्राः प्रदर्शयेत् आवाहनेना
मपरिक्रियावेष्टनं ततस्त्रिखण्डेन स्थापयिनी संनिरोधिनी अवगुण्ठनी संनिधानकरीं त
मस्त्रियो मुद्राः प्रदर्श्य द्राविती संक्षोभमुद्रा द्रीं इति द्राविणी क्लीं इत्याकर्षिणी ब्लूं इत्यावेशि
सः इत्युन्मादिनी क्रों महांकुशा ह्स्फ्रें इति खेचरी ह्सौं इति बीजमुद्रा बाणमेवोन्म
त्रिखण्डेन वा बाणकोदण्डमुद्रां पाशांकुशमुद्रां प्रदर्श्य स्थापयिनी विहाय यथानुबाणमु
द्रेति सप्तदशमुद्राः प्रदर्श्य प्राणप्रतिष्ठां कृत्वा षोडशोपचारैः पूजयेत् पंचोपचारैर्वा नेत्र
पाद्यार्घ्याचमनस्नानवसनाभरणानि च गंधपुष्पधूपदीपौ नैवेद्याचमनं ततः ताम्बूलम

५ चैनास्तोत्रंतर्प्पणंचनमस्क्रिया नैवेद्यंचमननमिति तदंगंनष्टधकं तर्प्पणमिति दीपोइङ्ग यथनाल
केरांबुफलइवेष्टुयथालाभंनिवेदनं पंचोपचारास्तुगंधपुष्पधूपदीपनैवेद्यानि तत्रपुष्पांतावुप
चारान् विद्यान्तनीयखंडेदिननित्याभ्यांविधायआवरणानिपूजयेत् विद्यान्तनीयखंडेनकुर्यात्स्व
जापचारकानित्येके: दिननित्यासाहित्यंनाथाज्ञयेति ततोगंधपुष्पाभ्यांगंधाद्यन्ताभ्यांत्रिभिर्वादे
वीमभ्यर्च्यपृष्ठेजयेति विमलामध्येदिव्यसिद्धमानुषान् देवीवामभागादिदक्षभागांतेत्रिपंक्त्यु
पविष्टानदेव्यवेदिणोदेवीरूपविशेषान्ध्यात्वा ह्रींश्रींप्रकाशानंदशक्तिपादुकांपूजयामि
ह्रींश्रींविमर्शानंदशक्तिपादुकांपूजयामि ह्रींश्रींआनंदानंदशक्तिपादुकांपूजयामि दि
व्यापते ह्रींश्रींश्रींज्ञानानंदशक्तिपादुकांपूजयामि ह्रींश्रींश्रींसत्यानंदशक्तिपादुकांपूज
ह्रींश्रींश्रींपूर्णानंदशक्तिपादुकांपूजयामि सिद्धाइमे ह्रींश्रींस्वभावानंदशक्तिपादुकांपूज
यामि ह्रींश्रींप्रतिभानंदशक्तिपादुकांपूजयामि ह्रींश्रींसुभगानंदशक्तिपादुकांपूजया
मि मानुषाइमे ततोदेव्याःसमूर्त्तिर्वानित्याःपंचदशापिच देवीमूर्त्तौनित्यसेतन्नह्वियाभिस्त
नमयीक्रमात् सर्वासांनित्यानांआवरणशक्तीनांध्यानानितु मध्यप्रधानदेव्यास्तुसमुल्ला
सात्मकत्वतः नवावरणशक्तीनांध्यानंदेव्याःसमंभवेत् कामाकर्षणादन्यत्रभूषावाणीपु
धादिकं तत्सर्वंपरमेशानिचक्रस्यानामशेषतइति तास्तुयथा ऐंस्कल्ह्रींनित्यक्लिन्ने
मदद्रवेसोः १ कामेश्वरीनित्याश्रीपादुकांपूजयामि ऐंभगभुगेभगिनिभगोदरिभगमाले

भगावहे भगगुह्ये भगयोनि भगनिपातनि सर्वभगवशंकरी भगरूपे नित्यक्लिन्ने भगस्व
रूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमो
घे भगविच्चे क्षुभ क्षोभय सर्वसत्वान् भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि
भगानि मे वशमानय स्त्रीं हर ब्लें ह्रीं भगमालिनी नित्या श्रीपादुकां पूजयामि ॥ ह्रीं
नित्यक्लिन्ने मदद्रवे स्वाहा नित्यक्लिन्ना नित्या श्रीपादुकां पूजयामि ॐ क्रों भ्रों क्रौं झ्रौं
छ्रौं ज्रौं स्वाहा भेरुण्डा नित्या श्रीपादुकां पूजयामि ॐ ह्रीं वह्निवासिन्यै नमः वह्निवासि
नी नित्या श्रीपादुकां पूजयामि ५ ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं महावज्रेश्वरी नि
त्या श्रीपादुकां पूजयामि ६ ह्रीं शिवदूत्यै नमः ह्सकलरडैं ह्सकलरडीं ह्सौः दूती नि
श्रीपादुकां पूजयामि ॐ ह्रीं हुं खे च छे क्षः स्त्रीं हूं क्षें ह्रीं फट् त्वरिता नित्या श्रीपादुकां पू
जयामि ७ ऐं क्लीं सौः कुलसुन्दरी नित्या श्रीपादुकां पूजयामि ८ ह्सकलरडैं ह्सकलरडीं ह्स
कलरडौः ह्सकलरडीं । ह्सकलरडौः नित्या नित्या श्रीपादुकां पूजयामि ९ ह्रीं
फ्रें स्त्रूं क्रौं भ्रों ह्लीं ऐं ब्लूं नित्यमदद्रवे फ्रें ह्रीं नीलपताका नित्या श्रीपादुकां पूजयामि
भम्र्यौं विजया नित्या श्रीपादुकां पूजयामि स्वौं सर्वमङ्गला नित्या श्रीपादुकां पूजयामि

९ ॐ नमो भगवति ज्वालामालिनी देवि देवि सर्वभूतसंहारकारिके जातवेदसि
ज्वलंति ज्वलज्वल प्रज्वल प्रज्वल ह्रीं ह्रीं ह्रूं र र र र र र र ज्वालामालिनि हुं फट् स्वा
हा ज्वालामालिनि नित्या श्री पादुकां पूजयामि १४ चक्रे चित्रा नित्या श्री पादुकां पू
जयामि १५ एवं देवी मूर्तीं संपूज्य क्रमादावरणानि पूजयेत् यथा ह्रीं श्रीं अणिमा
सिद्धि पादुकां पूजयामि पश्चिमद्वार शाखायां ह्रीं श्रीं लघिमासिद्धि पादुकां पूजया
मि पूर्वद्वारशाखायां ह्रीं श्रीं महिमासिद्धि पादुकां पूजयामि वायुकोणे ह्रीं श्रीं ईशि
त्वसिद्धि पादुकां पूजयामि ईशानकोणे ह्रीं श्रीं वशित्वसिद्धि पादुकां पूजयामि अ
ग्निकोणे ह्रीं श्रीं प्राकाम्यसिद्धि पादुकां पूजयामि निर्ऋतिकोणे ह्रीं श्रीं भुक्तिसिद्धि
पादुकां पूजयामि दक्षिणद्वारि ह्रीं श्रीं इच्छासिद्धि पादुकां पूजयामि उत्तरद्वारे ह्रीं
श्रीं रससिद्धि पादुकां पूजयामि पश्चिमद्वारवामशाखायां ह्रीं श्रीं सर्वकामासिद्धि
पादुकां पूजयामि पूर्वद्वारवामशाखायां ह्रीं श्रीं ब्राह्मी पादुकां पूजयामि पश्चिम
द्वारि ह्रीं श्रीं माहेश्वरी पादुकां पूजयामि पूर्वद्वारि ह्रीं श्रीं कौमारी शक्ति पादुकां पू
जयामि ह्रीं श्रीं वैष्णवी शक्ति पादुकां पू॰ ह्रीं श्रीं वाराही पादुकां पू॰ ह्रीं श्रीं इन्द्राणी पा

ङ्कां पू॰ वायव्यादिविदिक्षु ह्रीं श्रीं चामुण्डापादुकां पू॰ दक्षिणद्वारि ह्रीं श्रीं महालक्ष्मी
पा॰ उत्तरद्वारि इति प्रथमावरणं संपूज्य समस्तविद्यामन्त्रात्मिका त्रिपुरानित्यापादुकां पू॰
इति मध्ये पुष्पाञ्जलिं दत्त्वा ह्रीं श्रीं एताः प्रकटयोगिन्यः त्रैलोक्यमोहने चक्रे पूजिताः स
न्तु इति पुष्पाञ्जलिं दत्त्वा तां तां पूजां समर्प्य द्रां इति संक्षोभमुद्रां प्रदर्शयेदिति प्रथमा
वरणं ततः षोडशदले देव्यग्रमारभ्य प्रादक्षिण्येन ह्रीं श्रीं अं कामाकर्षिणीनित्या
कलापादु॰ ४ ह्रीं श्रीं आं बुद्ध्याकर्षिणीनित्याकलापादुकां पू॰ ह्रीं श्रीं इं अहंकाराकर्षि
णीनित्याकलापादुकां पू॰ ह्रीं श्रीं ईं शब्दाकर्षिणीनित्याकलापादुकां पू॰ ह्रीं श्रीं उं स्प
र्शाकर्षिणीनित्याकलापादु॰ ५ ह्रीं श्रीं ऊं रूपाकर्षिणीनित्याकलापादु॰ ६ ह्रीं श्रीं
ऋं रसाकर्षिणीनित्यापादु॰ ७ ह्रीं श्रीं ॠं गन्धाकर्षिणीनित्याकलापादु॰ ८ ह्रीं श्रीं
ऌं चित्ताकर्षिणी ९ ह्रीं श्रीं ॡं धैर्याकर्षिणी १० ह्रीं श्रीं एं स्मृत्याकर्षिणी॰ ११ ह्रीं
श्रीं ऐं नामाकर्षिणी॰ १२ ह्रीं श्रीं ओं बीजाकर्षिणी॰ १३ ह्रीं श्रीं औं आत्माकर्षिणी॰ १४
ह्रीं श्रीं अं अमृताकर्षिणी॰ १५ ह्रीं श्रीं अः शरीराकर्षिणीनित्यापादुकां पूजयामि १६
एवं समभ्यर्च्य मूलविद्यामन्त्रात्मिका त्रिपुरेश्वरीनित्याकलापादुकां पूजयामीति म

८ ऐं देवीमभ्यर्च्य ह्रीं श्रीं एताः बाह्ययोगिन्यः सर्वाशापूरके चक्रे पूजां गृह्णन्तु इति
पूर्ववत्पूजां समर्प्य द्रीं इति द्राविणीमुद्रां प्रदर्शयेदिति द्वितीयावरणं ततः तत्राष्टप
त्रेषु प्रादक्षिण्येन ह्रीं श्रीं अनङ्गकुसुमापादुकां पूजयामि ह्रीं श्रीं अनङ्गमेखलापा० २
ह्रीं श्रीं अनङ्गमदनापा० ३ ह्रीं श्रीं अनङ्गमदनातुरपा० कल्पितप्रागादिदिक्षु ह्रीं श्रीं
अनङ्गरेखापा० ह्रीं श्रीं अनङ्गवेगिनी ५।४। ह्रीं श्रीं अनङ्गाङ्कुशापा० ५ ह्रीं श्रीं अनङ्ग
मालिनीपा० ६ तथा वह्न्यादिकोणेषु मूलविद्यामन्त्रात्रिपुरसुन्दरीनित्यापादुकां
पूजयामीति मध्येऽभ्यर्च्य ह्रीं श्रीं एताः गुप्तयोगिन्यः सर्वसंक्षोभणे चक्रे पूजां गृह्ण
न्तु इति पूर्ववदभ्यर्च्य क्लीं आकर्षिणीमुद्रां दर्शयेदिति तृतीयावरणं ततश्चतुर्द
शारे देव्यग्रकोणमारभ्य प्रादक्षिण्येन ह्रीं श्रीं सर्वसंक्षोभणीशक्तिपादुकां पूज
यामि १ ह्रीं श्रीं सर्वविद्राविणीशक्तिपादु० २ ह्रीं श्रीं सर्वाकर्षिणीशक्तिपा० ३
ह्रीं श्रीं सर्वाह्लादिनीशक्ति० ४ ह्रीं श्रीं सर्वसंमोहिनीशक्ति० ५ ह्रीं श्रीं सर्वस्तम्भि
नीशक्ति० ६ ह्रीं श्रीं सर्वजृम्भिणीशक्ति० ७ ह्रीं श्रीं सर्वशंकरीशक्ति० ८ ह्रीं श्रीं स
र्वरञ्जिनीशक्ति० ९ ह्रीं श्रीं सर्वोन्मादिनीशक्ति० १० ह्रीं श्रीं सर्वार्थसाधिनीश

क्तिः १२ ऐं ह्रीं श्रीं सर्वसंपत्तिपूरणीशक्तिः १२ ऐं ह्रीं श्रीं सर्वमंत्रमयीशक्तिः १३ ऐं ह्रीं श्रीं
सर्वद्वंद्वक्षयंकरीशक्तिः १४ मूलविद्यामुक्त्वा त्रिपुरवासिनी नित्यापादुकां पूजयामि
ति मध्ये ऽभ्यर्च्य ऐं ह्रीं श्रीं एताः गुप्तयोगिन्यः सर्वसौभाग्यप्रदायके चक्रे पूजां गृह्णंतु इति
प्रागवत्समर्प्य ह्स्त्रैं आवेशिनीमुद्रां प्रदर्शयेदिति चतुर्थावरणं ततदंतर्दशारे देव्यग्र
कोणमारभ्य प्रादक्षिण्येन ऐं ह्रीं श्रीं सर्वसिद्धिप्रदादेवी पा० १ ऐं ह्रीं श्रीं सर्वसंपत्प्रदा
देवी० २ ऐं ह्रीं श्रीं सर्वप्रियंकरीदेवी० ३ ऐं ह्रीं श्रीं सर्वमंगलकारिणीदेवी० ४ ऐं ह्रीं श्रीं स
र्वकामप्रदादेवी० ५ ऐं ह्रीं श्रीं सर्वदुःखविमोचिनीदेवी० ६ ऐं ह्रीं श्रीं सर्वमृत्युप्रशमनी
देवी० ७ ऐं ह्रीं श्रीं सर्वविघ्ननिवारिणीदेवी० ८ ऐं ह्रीं श्रीं सर्वांगसुंदरीदेवी० ९ ऐं ह्रीं श्रीं सर्व
सौभाग्यप्रदायिनीदेवी० १० ततो मूलविद्यामुक्त्वा त्रिपुराश्री नित्यापादुकां पूजयामी
ति मध्ये संपूज्य ऐं ह्रीं श्रीं एताः संप्रदाययोगिन्यः सर्वार्थसाधके चक्रे पूजां गृह्णंतु
इति पूजां निवेद्य मः इति उन्मादिनीमुद्रां प्रदर्शयेदिति पंचमावरणं ५ ततस्तदं
तर्दशारे देव्यग्रकोणमारभ्य प्रादक्षिण्येन ऐं ह्रीं श्रीं सर्वज्ञादेवी० १ ऐं ह्रीं श्रीं सर्व

शक्तिदेवी॰ २ ह्रींश्रीं सर्वैश्वर्यप्रदादेवी॰ ३ ह्रींश्रीं सर्वज्ञानमयीदेवी॰ ४ ह्रींश्रीं स
र्वव्याधिविनाशिनीदेवी॰ ५ ह्रींश्रीं सर्वाधारस्वरूपादेवी॰ ६ ह्रींश्रीं सर्वपापहरादेवी॰ ७
ह्रींश्रीं सर्वानंदमयीदेवी॰ ८ ह्रींश्रीं सर्वरक्षास्वरूपिणीदेवी ९ ह्रींश्रीं सर्वेप्सितफ
लप्रदादेवी॰ १०॰ मूलविद्यामन्त्रान्त्रिपुरमालिनीनित्यापादुकांपूजयामीतिमध्येसं
पूज्य ह्रींश्रीं एताः कुलकौलनिर्गमयोगिन्यः सर्वरोगहरेचक्रे पूजांगृह्णंतु इति।
प्रागवत्समर्प्य ह्रीं इतिमहांकुशमुद्रांप्रदर्शयेदितिषष्ठमावरणं ततस्त्रिकोणाष्टा
रेदेव्याग्रकोणमारभ्यप्रादक्षिण्येन ह्रींश्रीं अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔं
अंअः रुं ब्लूं वशिनीवाग्देवतापादुकांपूजयामि १ ह्रींश्रीं कंखंगंघंङं कल्ह्रीं का
मेश्वरीवाग्देवता॰ २ ह्रींश्रीं चंछंजंझंञं न्व्लीं मोदिनीवाग्देवता ३ ह्रींश्रीं टंठंडं
ढंणं ह्ल्व्यूं विमलावाग्देवता॰ ४ ह्रींश्रीं तंथंदंधंनं ज्म्रीं अरुणावाग्देवता॰ ५ ह्रींश्रीं
पंफंबंभंमं ह्स्ल्व्यूं जयनीवाग्देवता॰ ६ ह्रींश्रीं यंरंलंवं झ्म्र्यूं सर्वेश्वरीवाग्दे
वता॰ ७ ह्रींश्रीं शंषंसंहंलंक्षं क्ष्म्रीं कौलिनीवाग्देवता॰ ८ मूलविद्यामन्त्रान्त्रिपुर

सिद्धानित्याया॰ इतिमध्येसंपूज्य॰ ऐंह्रींश्रींएताःरहस्ययोगिन्यःसर्वरत्नाकरेचक्रेपूजांगृह्ण
न्त्वितिप्राग्वत्समर्प्य ह्स्रैंह्स्क्ल्फ्रेंइतिखेचरीमुद्रांप्रदर्शयेदितिसप्तमावरणं ततोमध्ययो
नेरग्रमूलपार्श्वयोर्बहिरर्चयेत् पंचबाणान्तथाचापंपाशमंकुशमीश्वरी वाय्वादीशा
न्तमाग्नितोवामावर्तेनसंस्थितान् इतिक्रमेणत्रिकोणांतिकेपूजयेत् तत्रकमलरक्तकै
रवकल्हारेंदीवरसहकारपुष्पात्मकंबाणपंचकंविचिंत्यऐंह्रींश्रींषांरांलांवांसांद्रांद्रींक्लीं
ब्लूंसःसर्वजृंभनेबाणेभ्योनमः इतिसंपूज्यपुंड्रेक्षुकांडंतथध्यात्वा ऐंह्रींश्रींथंधंसर्वसंमो
हनायधनुषेनमःस्ववर्णंसंयोःपाशांकुशौविभाव्य॰ ऐंह्रींश्रींह्रींआंसर्ववशीकरणायपा
शायनमः ऐंह्रींश्रींक्रोंःसर्वस्तंभनायअंकुशायनमःपूजयेत् अत्रसर्वेषांस्थूलसूक्ष्म
परत्वबोध्या तत्रसाकारंस्थूलरूपंमंत्रात्मकंसूक्ष्मवासनात्मकंपरमिति ततस्त्रिको
णेअग्रकोणमारभ्यप्रादक्षिण्येन ऐंह्रींश्रींविद्याप्रथमखंडकामरूपपीठकामेश्व
रीदेवीश्रीपा॰ १ ऐंह्रींश्रींद्वितीयखंडसंज्ञापूर्णगिरिपीठवज्रेश्वरीदेवीश्रीपा॰ २ ऐंह्रींश्रीं
तृतीयखंडसंज्ञाजालंधरपीठभगमालिनीदेवीश्रीपा॰ ३ ततःसमस्तविद्यासंज्ञा

९ यैत्रिपुरांबानित्याया॰ ४ इतिमध्येसंपूज्य ह्रीं श्रीं एताः परापररहस्ययोगिन्यः सर्वसि
द्धिमयेचक्रेपूजांगतास्तृप्तास्संतु संपूज्य ह्सौंः इतिबीजमुद्रांप्रदर्शयेदितिसप्तमावरणं
ततः ह्रीं श्रीं समस्तविद्यामुक्ताउड्यानपीठे श्रीमहात्रिपुरसुंदरीदेवीश्रीपा॰ इति
संपूज्य॰ इदंपूर्वोक्तषोडशोपचारपंचोपचारयोरन्यतरेणविद्यात्मनीयथैडेतदिन
नित्याभ्यः संपूज्य पुनर्मूलविद्यामुक्तामहात्रिपुरसुंदरीनित्या इतिसंपूज्य ह्रीं श्रीं
पपाश्रीतिरहस्ययोगिनीसर्वानंदमयेचक्रेपूजांगतास्तृ इतिनिवेद्यरहस्याष्टप
दीपाद्युपचाराननविद्यायद्रां ह्रीं क्लीं ब्लूं सः क्रों ह्सौं एँ। ह्सौं। ऐं इतिस्वबीजोच्चार
णपूर्वकंसंक्षोभादिमुद्रानवकंप्रदर्शयेत् यांरांलांवांसांद्रांह्रींक्लींब्लूंसः इतिबाणमु
द्रा। थूंधं इतिधनुर्मुद्रां ह्रीं श्रीं इतिपाशमुद्रां क्रों इत्यंकुशमुद्रां प्रदर्श्य आत्मानंक
लारूपंध्यात्वागुरूपदेशतः मूलविद्यांदशवारंजपेत् मुद्रादर्शनकालेमुद्रात्रैवि
ध्यंबोध्यं यथास्थूलेरूपंप्रसिद्धं सूक्ष्मंमंत्रमयं पररूपंवंशलयोभूतानंगपूतः
क्रमात् तत्रव्यक्तासरवानादर्शनेनतत्कथ्यते तवमायाबहिर्मूनमस्त्वत्प्रसादादहं

त्रितीति भूतानि भौतिकानीत्यर्थः यं रं क्षां यं ङ लयो भूता भौतिकात्मना विभाव्य
ततश्चात्मा संतत्त्वदिक्षयाऽबद्धा बद्धगतिरूपं संसारं जायमानं तत्प्रसादादस्माद्वि
निर्मुक्तः साक्षी पश्यामीति आयान्विर्यर्थः ततश्चात्मानं मंत्रकलारूपं ध्यात्वा देवी
स्वाभेदेन संपूज्य पूर्वोक्तपंचदशविद्याभिर्देवीमभ्यर्च्य पंचभूतविद्याभिरात्मा
घ्रानकरेण देवीं पूजयेत् यथा यं अं पं कं चं टं तं पं फं बं प्राणशक्तिपा रं ई पं स्वं छं
टं णं फं रं हं अग्निशक्तिपा डं ऊं गं जं डं दं वं लं लं ऌं लाशक्तिपा अं ऋं ऋं अं ॡं जं ठं थं भं
बं मं यं तुशक्तिपा लं ऌं ॡं यं डं भंणं नं मं शं हं स्वशक्तिपा इत्यभ्यर्च्य ऽ ह्रीं हंसः सो
हं स्वाहा इति मंत्रेणाभ्यर्च्य ऊर्ध्वबिंबात्मकं वज्रं अधो विज्ञहृद्यात्मकं कुचद्वयं चत
स्रो ऽ घ्रैः शेषांगानि प्रकल्पयेत् इतिश्लोकार्थसंप्रदायः ततो ऽ चकलद्य देवी स्थूल
सूक्ष्मरूपाणि गुरुतो ऽ वबुध्य सूक्ष्मरूपमात्मानं भेदेन ध्यात्वा मंत्रवीर्यं स्फुटमादे
शतो मंत्रार्थानुसंधानपरो विद्यां जपेत् सहस्रं सहस्रमपि वापराः एकविंशतिमंत्रं शत
गोणः शतमष्टभयरूप इति तदुक्तं सहस्रं परतो देव्याः शतं तत्तद्दिने जप्त्वा संध्या

१० त्रयंषष्टिसंख्यामुक्तावाप्रोक्तस्वरूपतः इति अस्यार्थः सहस्रसंख्याः पत्राः
पूर्णतमितिनित्यानिक्रमेणायष्ट्विस्वरूपत्वात् भयस्वरूपता तदिनजमितिन
वषातःषड्विंशत्सख्याक्रेषोडशसायंषष्टिघटिका स्वरूपकैकाहतिथिरितिसंभू
यपकविंशतिषष्ठ्यधिकंशतं वापदार्थः संख्यात्रयंषष्टिसंख्यामितितदिन
जजपसंख्याप्रतिपादनात्तावान्संधानपरइतिततोजपंसमर्प्यदेव्यैः शुभ्रां
जलिंदत्वाहोमंकुर्यात् विधिस्तु यथोक्तलक्षणेकुंडे अथवापकांगुलोत्से
कहस्तायामविस्तारबालुकास्थंडिलेहोमं प्राणायामंकृत्वा अर्घ्योदकेन
कुंडंस्थंडिलंवाप्रोक्ष्यकुशैःप्रागग्रोदग्ररेखाचतुष्टयलिखित्वेनततन्मध्येनव
कोष्ठं विलिख्य अग्निमानीयक्रव्यादेभ्योनमः इतिदक्षिणस्यां दिशिंअंगारंत्य
क्त्वामूलविद्यातृतीयखंडेनतदग्निंनिरीक्ष्यविद्याभ्यां अग्निंनवकोष्ठमध्यको
ष्ठेनिधायतताभ्यामेवप्रज्वाल्यताभ्यामग्निंपरिषिच्यकुशैर्दर्भैर्वापरिस्तीर्य
वह्निंदेवीस्वरूपंध्यात्वासंपूज्यअर्घ्योदकेनाज्यादिहोमद्रव्यंप्रोक्ष्यस्रुवेण

वापालास्थास्यपैठेर्वीआज्येनघृतैः समजिकाहिरण्यागगनारक्ताकृष्णास्तुप्रभा
अतिरिक्ताबहुरूपाभिधाः स्मृत्वाततजिकास्मरणपूर्वं प्रतिजिह्वं मूलतार्तीयखंड
दिनानित्याविद्याभ्यां नवनवाहुतीर्हुत्वाषडंगक्रमेणावरणदेवताभ्यएकैकामाहु
तिंहुत्वा ततोमूलविद्यायाषोडशाहुतीर्हुत्वाषोडशवारंमूलविद्यांजपित्वात
तोऽर्घोदकेनाग्निंपर्युक्ष्य ततोदेवींस्वस्वमध्यस्थज्योतिषाएकीभूतांविभाव्यभ
स्मनातिलकंसंस्पर्श्य परिस्तरणदर्भानग्नौक्षिपेत् नित्यहोमद्रव्याणितु आज्य
मन्नप्रायसच तिलतंडुलप्रथम नद्वयंचेति संप्रोक्तान्युक्तान्येतानिनित्यकइति
नद्वयेतितिलतंडुलाविसर्पर्थाः इहएतावान् होमविधिर्गृह्यमेधीयेद्दवापूर्वं सतेनन
स्त्वगृह्योक्तधर्मसामान्यतांत्रिकहोमविध्यपेक्षाततोदेव्याग्रेअन्नव्यंजनपृथ्वाबुह
पंबलिंत्रिभिः कुरुकुल्लामंत्रैर्दद्यात् यथा ऐं कुरुकुल्लेस्वाहा कुरुकुल्लायाः ॐ
कुरुकुल्लेफ्रीः स्वाहार्घं ॐ कुरुकुल्लेफ्रीः ममसर्वजनंवशमानयह्रीं स्वाहा इति
ततः करतलयोस्त्रिरास्फालनंकृत्वाप्रसारिततर्जनीद्वयाभ्यांऊर्ध्वमध्यस्तृष्टिभ्यांकृ

११ र्घ्यैः स्थितिरूपाभ्यांदेवतायानिवेदितबलिंद्व्यद्व्यदर्शनेकारयित्वा
हस्तौपादौप्रक्षाल्यपुनर्देवीचक्रस्यांगयानिनाभ्यर्च्यदेवतावितीर्णप्रसा
दमंगीकृत्यपूर्ववत्कलारूपांतांविचिंत्यमूलाधारहृदयद्वादशांतेषुविद्या
खंडत्रयंविभाव्यगुरूपदिष्टमार्गेणहस्तत्रस्फोटं इतिखेचरीमुद्रांप्रदर्श्यसंहा
रमुद्रयाशक्तिवृंदमात्मन्युपसंहृत्यतांदेवींगुरूपदेशेनांतःप्रविश्यावस्थि
तांविभाव्यततःकरशुद्धिंषडंगवाग्देवतान्यासंकृत्वाप्राणायामंचकृत्वापू
र्वोक्तनाथस्तोत्रदेवीस्तोत्रेपठित्वाआत्मानंदेवीरूपंभावयन्कृताखिलक
र्तव्यःसर्वविहरेत् इतिकामतंत्रोक्तनित्यपूजाविधिः इतिमध्यविधिः अथसं
क्षेपतःपूजाविधिस्तत्रैव पूजाविधानदेवेशिनित्यक्रमोदितात् अशक्तानां
तुविस्तारेणतथापूजाप्रशस्यते अन्यथानर्थकारीस्यात्संकोचार्चनमीश्वरि
हेतिभिर्मध्यमायस्याद्वितीयंनवयोनिषु चतुर्दशारान्मध्यस्याचतुर्थंप्रो
क्तरूपता पंचमंसर्वदुःखार्तिनाशनंवाञ्छितप्रदं तत्प्रकारंचदेवेशिकु

रुकुल्मार्चने स्मृणु इति पंचप्रकारार्चा प्रोक्ता सर्वसमृद्धिदेति अस्यार्थः। अन
र्थकारीति अनर्थकारी विस्तृतपूजासमर्थानां संक्षिप्तार्चनं अस्तू तानर्थकारीत्य
र्थः आद्यचतुरस्रत्रिकोणदेवीत्रयपंचदशनित्यायेन मध्यदेवीपूजनं संकुचि
तेष्वाद्यपूजनं भवति केवलमध्यदेवतापूजनं वा द्वितीयं नवयोनिस्थिति वाग्दे
वि देवि मध्यान्त द्वितीयं पूजनं भवति चतुर्दशारावधिअन्याचतुर्दशारादिमध्या
न्तं तृतीयं पूजनमित्यर्थः चतुर्थं प्रोक्तं प्रोक्तरूपतः इति चतुरस्रादिमध्यान्तं प्रोक्त
क्रमादित्यर्थः पंचममिति कुरुकुल्लापटले इद्विराद्यं तद्गत्याद्यमध्येन नव
दलके ह्रीं पेतां ललितां नित्यविनोदानंददायिनीं यजेदित्यायुक्तगुणविशेषोपे
तां पूजयेदिति उपसंहरति इतीति अन्यापि संक्षिप्तदामर्चनप्रकारोऽत्रैव एकोनविं
शतिपटले ऽभिहितः यथा बालया करांगन्यासं विधाय नत्वार्घ्यसंकल्प्य अन
स्त्रिकोण द्वादशारे चक्रे तामावाह्य तृतीयखण्डेन संपूज्य ॐ ह्रीं त्रिपुरसुंदरीनि
त्यापादुकां पूजयामि मध्ये ॐ ह्रीं कामेश्वरीनित्यापा ऽमीत्यादिस्वस्वनामभिस्त्रि

१२ कोणे अग्निकोणमारभ्य प्रादक्षिण्येन तत्र तथा द्वादशारे पंचदशानि त्वामभ्यर्च्य ओं कु
रुकुल्ले स्वाहा इति समाराध्याग्रे तेबलिं दत्वा केवलं तत्तनीयं एवं जपेदिति तत्र क्र
लघुयंत्रक्रियामासां पूजां समर्थ्य सिद्धिदां पूर्णामनतिविस्तारां मंगलां ब्रूहि मे शि
वः इति पृष्टो भगवान्देवर्षिसिद्धगंधर्वयक्षदेवांगनाश्रयां पूजां वक्ष्यामि देवि ।
सृणुष्व सुमनोहरां विघ्नव्याकुलसंदर्याकरां गन्धाक्षपूर्वकं अर्चयेत्तया विधाया
पीठे चक्रे तिथायतनत्‌ इत्यादि चक्रमध्ये हृत्पद्मप्रागवनितोर्चयेन्नित्यास्वकोणेषु
प्रदक्षिणं अन्यास्त्वेषु कोणेषु पूजयेद्द्वादशक्रमात्‌ अथास्यदक्षिणपक्षा ब
लिं दद्याद्यथाविधि समाराध्य या केवलया केवलाल्लिलितां जपेदित्याद्यभिया
यनाम मंत्राणां वर्णसंख्यामभिधायानेन लघुप्रकारं यत्नेयंत्रं सर्वार्थसिद्धि
दमिति अथ संक्षेपतः पुरश्चरणविधिः पुरश्चरणदिनेषु त्रिसंध्यं पूजनं तत्र क
दलीफलगुडशार्कराज्यपायसं नैवेद्यं कर्पूरारात्रिकां च प्रतिसंध्यं पुरश्चर
णे चिकीर्षुस्स्वशक्त्यागुरुं संतोष्य तज्ज्ञयास्त्रगंधसलिलैः स्नातः पूजां दिने वे

षवान्मन्त्रा मंडपवर्तीश्रयोगपश्चलापरहितो नियताहारस्त्रीसंगवर्जीत्र्याकुल
चित्तः परार्थोग्रहणं वरस्त्रगन्धलेपनाभरणानि स्वसंख्यासहस्रं नित्यजपानंतरं
प्रतिसंख्यं द्वादशांशादिकैकादशाशतवारं विधाय जपितादततद्दशांशं त्रिमधुरैः प
लाशपुष्पैः कुसुम्भकुसुमैः कल्हारकुसुमैर्वा हुत्वा सकर्पूरजलैस्तावत्संतर्प्य
तत्संख्यया ब्राह्मणाः स्वगंधपुष्पैरर्चनं कृत्वा देवीं संपूज्य पूजां समापयेदित्येवं
त्रिसंध्यं एवं पूर्णादिपूर्णांतं लक्षं भवति एकं पुरश्चरणं कृत्वा पुनरंते गुरुं संपूज्य
संतोष्य तदनुज्ञया नित्यक्रमं भवेत् एकविंशतिलक्षं कृत्वा युगेषु पुरश्चरणं क
लौ चतुर्गुणं पुरश्चरणजपसंख्यायाः स्त्रीसंगरहितं पूर्णं सिद्धिलक्षणमिति शे
षं वनितादोषभवतोभोगान् न विघ्नं जायते यदि दृश्यते कैः तत्र सर्वमंत्रसाधारणत्वा
वलिखितो मंत्रतंत्रप्रकाशिकाकारोक्तो जपसंख्याविधिरुच्यते यथा एकाक्ष
रादिनवाक्षरांता मंत्राः पीडकाक्षरी बीजसंज्ञा तेषु पुनः ककारादक्षरसमसंख्यालक्षं त्रि
गुणितं कृत्वा तेजपेत् तां संख्यां पादार्धत्रिपादलक्षयान् द्विचतुर्गुणं त्रेतादौ ज

१३ पनीयात् दशाक्षरादिविंशत्यक्षरांतानां मंत्राणां पुरुषानुरूपमक्षरलक्षं जपः एक
विंशाक्षरादिशतांताक्षरांतानां मंत्राणां केवलं लक्षं जपः तदूर्ध्वाक्षराणामयुतं जपः इति
अस्याः संख्यातो न्यूनीयसमसंख्यानानेनस्यादेव विंशतिः नेतान्येषु शेषु स्यात्सं
ख्याहृद्धिकदीरितेति एवं कृते पुरश्चरणे मंत्रसिद्धिः इति पुरश्चरणविधिः अथ नै
मित्तिकं किंचिदुच्यते तत्र नित्यार्चनरतानां नैमित्ताधिकारः नित्यनैमित्तिकार्चारता
नां काम्येत दुक्तं नित्यनैमित्तिकं काम्यं सापेक्षं पूर्वतः अन्यथा भजनं चेत्कृतं करो
त्यापात्परं पदमिति तत्र चैत्रे दमनार्चनं चतुर्दश्यां दमनं समूलशाखं वा आनी
य विधिया शोधितं पात्रे निधाय विधियाभ्यर्च्य पंचोपचारैरेकांते पूजास्थले एवं तिथा
या परदिने नित्यपूजां नेतेन सविशेषं संपूज्य गुरुं पूजयेदिति । एवमग्रे पि पूज
नेषु चैत्र एव पूर्णायां वसंतोद्भवपुष्पैरर्चनं कर्पूरकाश्मीरचंदनैरपि पूजनं कार्यं
वैशाख पूर्णायां चंदनकर्पूरकस्तूरीवासितशीतलोदकैर्वा हिमोत्थजलैर्वा पू
जनं ज्येष्ठे पूर्णायां कदलीपलसाम्रफलैः पूजा आषाढे पूर्णायां मेलाकं

कोलज्ञानीगुरुकचंदनपुष्पैरर्चनं श्रावणे पूर्णिमायां पवित्रैः पूजा स्वर्णरजतपट्ट
कार्पासानामन्यतमेसूत्रं त्रिगुणं त्रिगुणीकृत्य सर्वासां षोडशांगुलषोडशसूत्रषोड
शग्रंथियुतानि पवित्राणि अथवानवांगुलसूत्रग्रंथाति अथवादेव्याः षोडशांगुल
सूत्रग्रंथियुतानि नित्यापंचदशसूत्रांगुलग्रंथियुक्तावरणानां एवं अष्टांगुलादिकं एवं ना
थानां नवांगुलादिकं कामेश्वर्यादिनामंगुलादि वाग्देवतानाम अष्टांगुलादि एवं स्ना
त्वा वक्रेदकसंख्यासमसूत्रायामग्रंथियुतानि पवित्राणि होमे तु एकसूत्रग्रंथि अ
ष्टोत्तरशतसूत्रायामग्रंथिपवित्रं शस्त्रवनारायं महूर्धमवलंबयेत वाराहीकु
रुकुल्लादीनां मूलविद्यावत्तु आत्मनः स्वंथादिनाभ्यंतं एवं योगिनां योगिनीनां च
सिद्धविद्याहि योगिनः क्रमतशिष्याणां तन्मात्रेण मंडपस्यैकसूत्रं षट्त्रवत्स्यंगुला
त्मकं एवं पवित्राणि पूर्वमधिवास्य द्वितीयदिने नित्यपूजां नैनैः पूजनं गुरुस्तवस्त्र
वगुरुपूजा च कर्तव्या पवित्राणामुत्क्रान्त्यमानकरणे दोषः न कुर्यान्मानसे कार्यं
यदि कुर्याद्विनश्यतीत्युक्तेः भाद्रपदे पूर्णिमायां केतकीपुष्पैरधिवासनपूर्वं पूजनं

१६ आश्विने शुक्लप्रतिपदमारभ्य पूर्णान्तं एकशतं मूलीकृत्य एकशतहुत्वा जयः ।
एवमेकशतहुत्वा होमः एवं पूर्णायां षट्शताधिकसहस्रहोमः पूजने च प्रत्य
हं नित्यपूजाहोमांते कुमारीमानीय तस्यां देवीमावाह्य संपूज्य भूषणावस्त्रदक्षिणा
भिः संतोष्य तस्यां देवीमात्मनि योजयेत् एवं प्रतिदिनमेकैकवृद्ध्या कुमारीपूज
नेतेन पूर्णायां षोडश तेन विद्यासिद्धिः तदूर्ध्वं तेन विद्या भवेत्सिद्धान्त्यपतिं कुरुते
चैकं इति कार्त्तिके पूर्णायां घृतौदधितद्दीपैर्होमः मूलविद्यायाः षोडशदीपान्
निपाना स्वस्वविद्यया पंचदशदीपान् आत्मनीशक्तीनामेकैकं दीपं दद्यात् षष्ठा
एकमध्ये प्राभितोष्टौ दीपान्निधाय पुष्पैरभ्यर्च्य विद्यया निवेदयेत् मार्गशीर्षे ना
रिकेरजलकर्पूराभ्यां माषपिष्टापूपैरर्चयेत् पौषे पूर्णायां शर्करागुडमोदकद्र
व्याणि निवेदयेत् माघे शुक्ले कुल्मैर्वा तिलैर्द्रव्यशर्करापूपादिभिः पूर्णायामर्
चयेत् फाल्गुने पूर्णायां स्वर्णरजतपुष्पैः पद्मैरान्यपुष्पैश्च पूजयेत् एवं तुला
मेषसंक्रान्त्योः कर्कमकरयोरमावास्यायां स्वजन्मदिने विद्याप्राप्तिदिने गुरुज
न्ममरणदिनयोः ग्रहणत्रयसंपातविनेपूर्णायां युगादिषु अष्टमीचतुर्दश्योः

सविशेषं पूजयेत् इति नैमित्तिकं अथ किंचित्काम्यं मूलाधारहृदयद्वादशान्ते
पुष्पावरणां देवीं विभाव्य तत्स्वत्रमनसैव पूजयतः शीघ्रं सर्वेष्टलाभः तत्र पू
र्णप्रतीतौ भावयन्नान्यथा निजजन्मनक्षत्रे दशमे एकोनविंशतिनक्षत्रे शुक्रं भे
संस्थाप्य ब्रह्मरोधाधिकस्थितजलेनार्घ्यविधिवदभ्यर्च्य सहस्रमभिमंत्र्य ते
नाभिषेकात्सर्वेष्टलाभः शुक्लप्रतिपदमारभ्य पूर्णान्तं पञ्चमैस्त्रिमध्वक्तैः श्वेतैः रक्तै
र्वा कल्हारैर्वा श्वेतरक्तकुसुमैर्देव्याः प्रतिदिनं शतं सहस्रं होमात् प्रतिमासमेवं वर्षे
णावश्यमहती संपत्तिः पलाशपुष्पैर्होमान्मेधावृद्धिः बिल्वपत्रपुष्पफलस्यो
समिद्धोमाद्धनलाभः अथवा स्नातोन्नलिदाः स्रग्वी वसितगंधस्रगंबरः संपू
ज्य देवीं स्पृष्टात्मा संस्कृते हव्यवाहने सवत्सायाः सितायाः गोः पयसि द्विगुणे प
चेत् प्रस्थमात्रं तंडुलं शालिजं सितमेव वा सिताज्यं यथत्रैव पेयं कृत्वा तत्सिक्
कं सह गृहीत्वा पाणिना वियोजयित्वा शतवारकं श्रियं मे देहि देवीति प्रोक्त्वा का
ष्ठोज्ज्वलेनानले हुत्वा समाप्य पूजां तत्तथा भक्त्वा तद्दिने मौनी तद्गमयेद्विद्वान्

१५ श्रियमाप्नोतिशुक्लकाले निरंतरं नित्यशश्चजपयाश्वेन दद्यैव्ययं नकदापिस्मा
र्त्तुंचतत्पठनात्‌मंत्रशक्तयः इतिपाकोत्तरेघृतत्रयस्य शर्करायोगः किरंतिरंप्रति
दिनरात्रिनित्यशोयावभावं सचक्रपरिवारांतांदेवीं सलिलमध्यगां तर्प्पयेत्कु
सुमैः सचैः सर्वोपद्रवशांतये इत्यादिप्रयोगः कादिमतान्तहृदेशान्तश्च बा
ध्याः विशेषतो भावनाध्यान विशेषाभावनाप्रयोगाश्च गुरुमुखवेद्योऽवगंत
व्या इत्यातिरहस्यं कादिमतोक्तं नित्याकवचं लिख्यते यथा समस्तापत्ति
त्पर्थ्यं सर्वसंपद्वाप्तये भूतप्रेतपिशाचादिपीडाशांत्यै वश्याप्तये समस्तरो
गनाशायसमरेविजयायच चौरसिंहद्वीपिगजगवयादिभयानके अरण्ये
शैलगहनेमार्गेदुर्भिक्षकेतथा सलिलाग्निमहत्पीडाव्याघ्रपोतादिसंकटे
प्रजप्यनित्याकवचंसकृत्सर्वंतरत्यसौ सुखीजीवतितिर्ईद्वीतिःसंपन्नोजि
तेंद्रियः श्रीदेविनतःकवचंवक्ष्येनवतत्वात्मकं येनाहमपिवद्वेषु देवासुर
मध्येसदा सर्वतःसर्वदात्मानंललितापातुसर्वदा कामेश्वरीपुरतःपातुम


गमालात्वनंतरं दिशंपातुसदादक्षपार्श्वंमेपातुसर्वदा नित्यक्लिन्नाचभेरुंडादिशं
पातुसदामम तथैवपश्चिमंभागंरक्षेत्सावह्निवासिनी महावज्रेश्वरीरक्षेदनंतरंदि
शंमम वामपार्श्वंसदापातुहूतीमेत्वरिताततः पालयेत्तुदिशंचान्यांरक्षेन्मांकुलसुं
दरि नित्यामामूर्ध्वतःपातुसाधोमेपातुसर्वदा नित्यानीले देहेंद्रियमनःप्राणान्ज्वा
लामालिनीविग्रहान् पायेद्दिशंचित्राचित्तंमेपातुसर्वदा नित्यानीलपताकाद्या
विजयासर्वतश्चमां करोतुमेमंगलानिसर्वदासर्वमंगला कामाक्रोधात्तथालो
भान्मोहान्मानान्मदादपि पायान्मात्सरतःशोकात्संशयात्सर्वतस्तथा स्तैमित्या
चमनस्योगादशुभेषुतुकर्मसु प्रसत्यात्क्रूरचिंतातोहिंसातश्चौर्यतस्तथा रक्षेतु
मांसर्वदाताःकुर्वंतिविघ्नंशुभेषुच नित्याःषोडशमांपातुगजारूढाःस्वशक्तिभिः तथा
हयसमारूढाःपातुमांसर्वतःसदा हंसारूढाश्चमांपातुमांपातुरथगताश्चपि
रथारूढाश्चमांपातुसर्वतःसर्वदारणे तार्क्ष्यारूढाश्चमांपातुतथाव्योमगताश्चपि।
भूतगाःसर्वगाःपातुमांसर्वत्रचसर्वदा भूतप्रेतपिशाचापस्मारकृत्यादिकान्ग्रहान्

१९ द्रावयंतस्त्वशक्तीनां भूषणैरायुधैर्मम गजाश्वद्वीपिपंचास्यतार्क्ष्यरूपास्त्विला
युधाः असंख्याः शक्तयो देव्याः पान्तु मां सर्वतः सदा सायंप्रातर्जपेन्नित्यं कवचं सर्व
रक्षकं कदाचिन्नाशुभं पश्येन्न स्पृशोति च मत्समः इति नित्याकवचं रहस्यध्यानं तु
सर्वासां नित्यानां द्वैविध्यं स्थूलसूक्ष्मैर्भेदेन तत्र स्थूलमुक्तं सूक्ष्मं मंत्रमयं त्वन्यतंत्रे
व यथा सूक्ष्मरूपाणि च तथा कथयामि तवानघे येन ते साधकाः सर्वे वांछितं प्राप्नु
युः क्षणात् प्रोक्तेषु षडाधारपद्मेषु लोहितात्मैक्यविग्रहं विभाव्य तेषां निचयं तत्र सिं
द्धिं विचिंतये तेन सर्वमभीष्टं तु समवाप्नोत्ययत्नतः पूजातर्पणहोमादिरहितं भावने
नैव परं ध्यानमुदितम खंडात्मविमर्शतः निर्वातदीपसंकाशमात्मनात्मनिरीक्षणा
त् स्थूलेन साधयेन्नत्रदिष्टं सर्वं शुभाशुभं प्रोक्तक्रमेण देवेशि सततं साध्यसाधको
सिद्धिलब्ध सूक्ष्मरूपेण ध्यानेन सकलेप्सितं साधयेत्परं रूपं तु साध्यसाधकसिद्धये
इति लोहितात्मैकविग्रहमिति षडाधारपद्मेषु स्वात्मभेदेन लोहिततेजोनिचयं
विभाव्य तत्र साध्यसाधककर्मणां स्वरूपेण भावनयाभीष्टसिद्धिरिति अखंडा

त्मविमर्श इति कटकमुकुटादिविभूषणेष्वष्टस्वेततत्तदाकारतया स्थितपर
शक्तिर्विमर्श इत्यर्थः अन्यदपि तच्चैव दाडिमीकेसरसमत्विते जोरूपाः स्मरत्यपिया त
न्मध्ये सा स्वरूपं च निजवाञ्छानुरूपकं समस्तसिद्धिमाप्नोति शुभानशुभानपि तथा
स्वशुमाणां तःस्त हि चिंतयेद्गमागमागमं तेनारिवलं निजेष्टं प्राप्नोति ध्यानवैभवात्
गमागममिति मूलादिब्रह्मरंध्रांतमारोहावरोहणेत्यर्थः अत्र साधकसिद्धयोरेवाधिका
रः मातृकान्तरोपाधिशुभ्राशुतरुक्मान्तरं यथा तथा विजवर्णौषधानि संगृह्यते मंत्रा
णां सममयासं(योग)हिकाः कुर्यात् तासां प्रजनात्मायारूणात्तद्दोषाधिक्य स्थितजला
भिषेकात् तल्लेपात् तन्नैवेद्यात् तत्स्मरणात् मंत्रसिद्धिः अत्रौषधानि मूलपव
विलोक्यानि अन्येन सिद्धपायाः मंत्रान्तराणि मानार्कस्य प्रयोगा अत्र मूले विलोक्याः
अत्रन्यासमर्थपात्रस्थापनपूजने षडध्वशोधनरोदितगुणोपसंहारेण भवति अस्य तत्र
स्यानपेक्षितत्वात् तथात्रोपक्रमे दर्शितं यथा तेषामन्योन्यसापेक्षता जायते म ।
ति विभ्रमः तस्मात्वं निरपेक्षं मे तत्त्वं तासां वद प्रभो इति देवीप्रश्नोत्तरं स्पाण्डकाण
मेतत्तं च पूर्णमहिम्नानपेक्षया इत्यादिना अपूर्वेनान्यानपेक्षितत्वात् अत एव स्वतं

८ त्रैतंत्रं वितिलमवातीनरदिदमिति श्राचार्याश्राहुः इति कादिमतानुसारि
णी ललितापूजनं निर्मया लिखितागुरुदर्शितक्रमादि ह्यणाथायमम्नो विधी
यतो बालार्ककिरणोदीप्तमाणिक्याचलसप्रभं नित्यानंदमजं पूर्णं दिव्यज्योति
र्नमाम्यहं इति कादिमतानुसारेण ललितापूजनविधिः समाप्ता श्रीरस्तु

१४०



नं० ५६४८-घ

कादिमतानुसारेण श्री ललितापूजन विधिः (तन्त्रम्)

पत्राणि १७ (सप्तदशानि) (संपूर्णम्)